सङ्गीते कटपयादिसङ्ख्या-सूत्रसम्बन्धः

● वसन्ताश्यामलम्, नागपुरम् (महा.)

'कटपयादिः' नाम कः ? क-ट-प-यप्रभृतीनां समूहः । एतदङ्गभूतानि संस्कृताक्षराणि एव क-ट-प-यप्रभृतीनि । एतानि अक्षराणि सङ्ख्यासूचनाय गणिते बहुधा उपयुज्यन्ते । 'क'कारादि-'ह'कारान्तेषु वर्णेषु एकैकमपि अक्षरम् एकैकां सङ्ख्यां सङ्केतयति । एवम् अक्षरैः सङ्ख्यानिर्देशाय उपयुज्यमानः क्रमः एव 'कटपयादि'-सङ्ख्याक्रमः इति उच्यते । आदौ किम् अक्षरं कां सङ्ख्यां सङ्केतयति इति पश्याम । अधस्तनं कोष्ठकं पश्यत, यच्च कस्याः सङ्ख्यायाः सूचनाय किम् अक्षरम् उपयुज्यते इति (कानि अक्षराणि उपयुज्यन्ते इति वा) सूचयति -

१	२	३	४	५	६	७	८	९	०
क	ख	ग	घ	ङ	च	छ	ज	झ	ञ
ट	ठ	ड	ढ	ण	त	थ	द	ध	न
प	फ	ब	भ	म					
य	र	ल	व	श	ष	स	ह		

अत्र '१' इत्यस्याः सङ्ख्यायाः सूचनाय कटपयाः उपयुक्ताः । एवमेव '२' इत्यस्याः सङ्ख्यायाः सूचनाय खठफराः उपयुक्ताः । एवमेव इतरत्रापि ज्ञेयाः । 'कादयः दश , टादयः दश, पादयः पञ्च, यादयः अष्ट च विविधाः सङ्ख्याः सूचयन्ति इत्यतः अस्य क्रमस्य नाम 'कटपयादिसङ्ख्याक्रमः' इति जातम् ।

तथा हि श्लोकः -

नञावचश्च शून्यानि सङ्ख्याः कटपयादयः ।
मिश्रे तूपान्त्यहल्सङ्ख्या, न च चिन्त्यो हलस्वरः ॥

[कटपयादिषु नकारः, ञकारः, सर्वे स्वराः च शून्यं सङ्केतयन्ति । अन्ये वर्णाः यथाक्रमं प्रथमादिसङ्ख्यां सङ्केतयन्ति । संयुक्ताक्षरे उपान्त्यः व्यञ्जनवर्णः स्वीकार्यः, अन्ये उपेक्ष्याः । स्वररहितः व्यञ्जनवर्णः गणनावसरे न स्वीकरणीयः ।]

कर्णाटकसङ्गीतस्य, अस्य क्रमस्य च महान् सम्बन्धः अस्ति । तत्सम्बद्धाः केचन अंशाः सङ्क्षिप्ततया अत्र विव्रियन्ते ।

सर्वैरपि विदितमेव यत् सङ्गीते 'स रि ग म प ध नि' इत्येते सप्त स्वराः* सन्ति इति । स्वरमेलनेन उत्पन्नः ध्वनिः, यः कर्णयोः मनसे च आनन्दानुभूतिं ददाति सः 'रागः' इति उच्यते ।

कर्णाटकसङ्गीते 'स' (षड्जः), 'प' (पञ्चमः) इत्येतयोः एकैकं स्थानम् । मध्यमस्य द्वयम् - शुद्धमध्यमः, प्रतिमध्यमः चेति । अन्येषां सर्वेषां स्वराणां त्रीणि स्थानानि । विवरणं यथा -

१. स - षड्जः
२. रि - १ - शुद्धऋषभः
रि - २ - चतुःश्रुतिऋषभः
रि - ३ - षट्श्रुतिऋषभः
३. ग - १ - शुद्धगान्धारः
ग - २ - साधारणगान्धारः
ग - ३ - आन्तरगान्धारः
४. म - १ - शुद्धमध्यमः
म - २ - प्रतिमध्यमः
५. प - पञ्चमः
६. ध - १ - शुद्धधैवतः
ध - २ - चतुःश्रुतिधैवतः
ध - ३ - षट्श्रुतिधैवतः
७. नि - १ - शुद्धनिषादः
नि - २ - कैशिकीनिषादः
नि - ३ - काकलीनिषादः

यस्मिन् रागे सप्त स्वराः भवेयुः (स रि ग म प ध नि इति) सः उच्यते 'सम्पूर्णरागः' इति । सम्पूर्णरागस्य अपरनामानि 'कर्तृरागः' 'मेलावर्तरागः' 'जनकरागः' चेति । एते ७२ सन्ति । एतत्



* ये सप्त स्वराः 'स रि ग म प ध नि' इति, तेषु 'रि' इत्यस्य 'रे' इति, 'ध' इत्यस्य 'द' इति वा क्वचित् (परम्पराभेदात्, प्रदेशभेदात्, प्रादेशिकभाषाप्रभावकारणात् वा) उच्चार्यते । शास्त्रीयम् उच्चारणं तु - 'स रि ग म प ध नि' इत्येव स्यात् । तथा हि सङ्गीतनारायणः - 'सरिगमपधनि इति षड्जग्रामस्य मूर्च्छनाः' इति । चतुर्दण्डीप्रकाशिकायां यथा - 'सरिगाख्यास्त्रयस्तत्र...' - (१.३२) 'एतेषु मपधनि-आख्याः चत्वारः...' - (१.३३)

टपयादिः' नाम कः ? क-ट-प-यप्रभृतीनां समूहः । एतदङ्ग-भूतानि संस्कृताक्षराणि एव क-ट-प-यप्रभृतीनि । एतानि अक्षराणि सङ्ख्यासूचनाय गणिते बहुधा उपयुज्यन्ते । 'क'कारादि-'ह'कारान्तेषु वर्णेषु एकैकमपि अक्षरम् एकैकां सङ्ख्यां सङ्केतयति । एवम् अक्षरैः सङ्ख्यानिर्देशाय उपयुज्यमानः क्रमः एव 'कटपयादि'-सङ्ख्याक्रमः इति उच्यते । आदौ किम् अक्षरं कां सङ्ख्यां सङ्केतयति इति पश्याम । अधस्तनं कोष्ठकं पश्यत, यच्च कस्याः सङ्ख्यायाः सूचनाय किम् अक्षरम् उपयुज्यते इति (कानि अक्षराणि उपयुज्यन्ते इति वा) सूचयति -

१	२	३	४	५	६	७	८	९	०
क	ख	ग	घ	ङ	च	छ	ज	झ	ञ
ट	ठ	ड	ढ	ण	त	थ	द	ध	न
प	फ	ब	भ	म					
य	र	ल	व	श	ष	स	ह		

अत्र '१' इत्यस्याः सङ्ख्यायाः सूचनाय कटपयाः उपयुक्ताः । एवमेव '२' इत्यस्याः सङ्ख्यायाः सूचनाय खठफराः उपयुक्ताः । एवमेव इतरत्रापि ज्ञेयाः । 'कादयः दश , टादयः दश, पादयः पञ्च, यादयः अष्ट च विविधाः सङ्ख्याः सूचयन्ति इत्यतः अस्य क्रमस्य नाम 'कटपयादिसङ्ख्याक्रमः' इति जातम् ।

तथा हि श्लोकः -

नञावचश्च शून्यानि सङ्ख्याः कटपयादयः ।
मिश्रे तूपान्त्यहल्सङ्ख्या, न च चिन्त्यो हलस्वरः ॥


[कटपयादिषु नकारः, ञकारः, सर्वे स्वराः च शून्यं सङ्केतयन्ति । अन्ये वर्णाः यथाक्रमं प्रथमादिसङ्ख्यां सङ्केतयन्ति । संयुक्ताक्षरे उपान्त्यः व्यञ्जनवर्णः स्वीकार्यः, अन्ये उपेक्ष्याः । स्वररहितः व्यञ्जनवर्णः गणनावसरे न स्वीकरणीयः ।]

कर्णाटकसङ्गीतस्य, अस्य क्रमस्य च महान् सम्बन्धः अस्ति । तत्सम्बद्धाः केचन अंशाः सङ्क्षिप्ततया अत्र विव्रियन्ते ।

सर्वैरपि विदितमेव यत् सङ्गीते 'स रि ग म प ध नि' इत्येते सप्त स्वराः* सन्ति इति । स्वरमेलनेन उत्पन्नः ध्वनिः, यः कर्णयोः मनसे च आनन्दानुभूतिं ददाति सः 'रागः' इति उच्यते ।

कर्णाटकसङ्गीते 'स' (षड्जः), 'प' (पञ्चमः) इत्येतयोः एकैकं स्थानम् । मध्यमस्य द्वयम् - शुद्धमध्यमः, प्रतिमध्यमः चेति । अन्येषां सर्वेषां स्वराणां त्रीणि स्थानानि । विवरणं यथा -

१. स - षड्जः
२. रि - १ - शुद्धऋषभः
   रि - २ - चतुःश्रुतिऋषभः
   रि - ३ - षट्श्रुतिऋषभः
३. ग - १ - शुद्धगान्धारः
   ग - २ - साधारणगान्धारः
   ग - ३ - आन्तरगान्धारः
४. म - १ - शुद्धमध्यमः
   म - २ - प्रतिमध्यमः
५. प - पञ्चमः



६. ध -१ - शुद्धधैवतः
ध -२ - चतुःश्रुतिधैवतः
ध -३ - षट्श्रुतिधैवतः
७. नि -१ - शुद्धनिषादः
नि -२ - कैशिकीनिषादः
नि -३ - काकलीनिषादः

यस्मिन् रागे सप्त स्वराः भवेयुः (स रि ग म प ध नि इति) सः उच्यते 'सम्पूर्णरागः' इति । सम्पूर्णरागस्य अपरनामानि 'कर्तृरागः' 'मेलावर्तरागः' 'जनकरागः' चेति । एते ७२ सन्ति । एतत् अतिरिच्य 'षाडव-रागः' 'औडवरागः' चेति उभयविधौ रागौ अपि स्तः । तयोः भेदाः अपि सन्ति । परन्तु अधुना सूक्ष्मरागभेदज्ञानस्य आवश्यकता नास्ति, मूलभेदमात्रस्य ज्ञानं पर्याप्तम् इत्यतः स च अंशः अत्र न विस्तार्यते । उक्तस्य सारः तु -

- सप्त स्वराः यत्र भवेयुः सः 'जनकरागः' इति उच्यते ।
- षट् स्वराः यत्र भवेयुः सः 'षाडवरागः' इति उच्यते ।
- पञ्च स्वराः यत्र भवेयुः सः 'औडवरागः' इति उच्यते ।

७२ रागेषु ३६ रागाः 'पूर्वाङ्गरागाः' इति उच्यन्ते । एते शुद्ध-मध्यमस्वरयुक्ताः । (कोमल'म'युक्ताः इत्यर्थः) शिष्टाः ३६ रागाः 'उत्तराङ्गरागाः' । एते च प्रतिमध्यमस्वरयुक्ताः (तीव्र'म'-युक्ताः इत्यर्थः) षण्णां रागाणाम् एकं चक्रम् । प्रतिचक्रं षट् रागाः भवन्ति । आहत्य द्वादश चक्राणि । एतेषां चक्राणां निर्देशाय इन्दुनेत्राग्निवेदादीनि पदानि प्रयुक्तानि । चन्द्रः एकः । द्वे नेत्रे । त्रयः अग्नयः । चत्वारः वेदाः । अतः तां तां सङ्ख्यां सूचयितुं ते ते शब्दाः प्रयुक्ताः । एवमेव अग्रे अपि ज्ञेयम् । चक्रविवरणं सङ्क्षेपेण चित्ररूपेण प्रदीयते अधः ।

इदानीं कस्मिन् रागे के स्वराः भवन्ति इति पश्याम । तदर्थम् अधोनिर्दिष्टाः द्वित्राः अंशाः मनसि स्थापनीयाः ।

१. जनकरागाः (कर्तृरागाः) पूर्वाङ्गरागत्वेन उत्तराङ्गरागत्वेन च द्विधा विभक्ताः ।
२. प्रतिरागम् आदिमाक्षरद्वयं रागसङ्ख्यां सङ्केतयति ।
३. रागसङ्ख्यायाम् एकं न्यूनीकृत्य षड्भिः भाजनीयम् । तदा -
   (i) 'रि''ग'योः स्वरूपम् इत्थम् -
   - भागलब्धः '०' चेत् - रि-१, ग-१
   - भागलब्धः '१' चेत् - रि-१, ग-२
   - भागलब्धः '२' चेत् - रि-१, ग-३
   - भागलब्धः '३' चेत् - रि-२, ग-२
   - भागलब्धः '४' चेत् - रि-२, ग-३
   - भागलब्धः '५' चेत् - रि-३, ग-३

   (ii) 'ध''नि'स्वरयोः स्वरूपम् एवम् -
   - शेषः '०' चेत् - ध-१, नि-१
   - शेषः '१' चेत् - ध-१, नि-२
   - शेषः '२' चेत् - ध-१, नि-३
   - शेषः '३' चेत् - ध-२, नि-२
   - शेषः '४' चेत् - ध-२, नि-३
   - शेषः '५' चेत् - ध-३, नि-३
४. सर्वेष्वपि स्वरेषु 'स' 'प' इत्यनयोः स्थानं नियतं भवति । उदाहरणद्वारा एतमेव अशं स्पष्टतया अवगच्छेम ।

'धीरशङ्कराभरण'नामकः कश्चन रागः अस्ति । एषः 'जनकरागः', यतः सप्त अपि स्वराः एतस्मिन् सन्ति ।

१. स - षड्जः
२. रि -२ - चतुःश्रुतिऋषभः
३. ग -३ - आन्तरगान्धारः
४. म -१ - मध्यमः
५. प - पञ्चमः
६. ध -२ - चतुःश्रुतिधैवतः
७. नि-३ - काकलीनिषादः

अधुना 'धीरशङ्कराभरण'शब्दस्य आदिमे द्वे अक्षरे दृश्यताम् । 'ध' 'र' इत्येते अक्षरे कां सङ्ख्यां सूचयतः ? ऊर्ध्वलिखितं कोष्ठकं दृश्यताम् । 'ध' इत्यस्य अक्षरस्य सङ्ख्या '९' । 'र' इत्यस्य सङ्ख्या च '२' । अधुना ते उभे अपि सङ्ख्ये समवेततया लिख्यताम् । '९२' इति प्राप्तं ननु ? अङ्कानां वामतो गतिः । अतः तौ अङ्कौ वामतः क्रमेण लिख्यताम् । '२९' इति सङ्ख्या प्राप्ता ननु ? एतस्य तात्पर्यं यत् 'धीरशङ्कराभरण'रागस्य कटपयादिसङ्ख्या '२९' इति ।

धीरशङ्कराभरणरागः पूर्वाङ्गरागः । तस्य सङ्ख्यया एकं न्यूनीकृतं चेत् २८ लभ्यते । (२९ - १ = २८) सा षड्भिः भाजिता चेत् भागलब्धः '४', शेषः च '४' । अतः भागलब्धः (४) रि - ●●